# Sattvaradhanagatha

# સત્ત્વારાધનગાથા

## Document Information

Text title : Sattvaradhanagatha

File name : sattvArAdhanagAthA.itx

Category : misc, buddha

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# સત્ત્વારાધનગાથા

આર્ય નાગાર્જુનકૃતા
સત્ત્વાર્થમેવ મયિ તિષ્ઠતિ સત્ત્વશ્રદ્ધા
નાન્યત્ર સા, હ્યહમહોઽધિગૃહીતસત્ત્વઃ ।
ચર્યાઽધમા કરુણયા રહિતા ભવેદ્ યા
સમ્ભાવ્યતે કરુણયૈવ પ્રહાણમસ્યાઃ ॥ ૧॥

સત્ત્વેષુ યસ્ય નિતરાં કરુણાપ્રવૃત્તિ-
રારાધકઃ સ મમ શાસનમર્મવેત્તા ।
શીલં શ્રુતિશ્ચ કરુણા ચ સુધીશ્ચ યસ્ય
નિત્યં સ એવ સુગતાર્ચનકૃન્નિગદ્યતે ॥ ૨॥

કલ્યાણકારમધિકૃત્ય ગતોઽસ્મિ સિદ્ધિં
સત્ત્વાર્થમેવ તનુમેષ સમુદ્વહામિ ।
નૈવં ક્રિયેત યદિ સત્ત્વહિતં મયા ચેદ્
વ્યર્થં કરોમિ તનુપોષણમન્નપાનૈઃ ॥ ૩॥

સત્ત્વાન્ હિનસ્તિ મનસાપિ હિ યઃ સ કસ્મા-
ન્મામેવ સંશ્રયતિ યો મયિ નિર્વ્યપેક્ષઃ ।
પૂજા તુ સા ભવતિ સત્ત્વહિતેક્ષણાપિ
પૂજ્યસ્ય યા મનસિ તુષ્ટિમુપાદદાતિ ॥ ૪॥

હિંસાત્મિકા પરવિહેઠનસમ્ભવા વા
પૂજા ન પૂજ્યમનુગચ્છતિ સંસ્કૃતાપિ ।
દારાઃ સુતાશ્ચ વિભવશ્ચ મહત્ત્વ(ચ્ચ) રાજ્યં
માંસં ચ શોણિતવસે નયતે શરીરમ્ ॥ ૫॥

યેષાં પ્રિયત્વમધિકૃત્ય મયોજ્ઝિતં યત્
યસ્તાન્ વિહેઠયતિ તેન વિહેઠિતોઽહમ્ ।
સત્ત્વોપકારપરમા હિ મમાગ્રપૂજા

સત્ત્વાપકારપરયા ચ પરાભવઃ સ્યાત્ ॥ ૬॥

સત્ત્વાન્ પ્રાપ્ય મયા કૃતાનિ કુશલાન્યારાધિતાસ્તાયિનઃ
પ્રાપ્તાઃ પારમિતાશ્ચ સત્ત્વસમિતેરેવાર્થમાતિષ્ઠતા ।
સત્ત્વાર્થેન સમુદ્યતેન મનસા મારસ્ય ભગ્નં બલં
સત્ત્વૈરેવ તથા તથા વિરચિતં યેનાસ્મિ બુદ્ધઃ કૃતઃ ॥ ૭॥

કસ્મિન્ વસ્તુનિ સિદ્ધ્યતામિહ કૃપા મૈત્રી ચ ક્વાલમ્બતાં
ક્વોપેક્ષામુદિતાદિવસ્તુવિષયઃ કસ્મિન્ વિમોક્ષાદયઃ ।
કસ્યાર્થે કરુણાપરેણ મનસઃ ક્ષાન્તિશ્ચિરં ભાવિતા
ન સ્યુર્જન્મનિ જન્મ(નિ) પ્રિયવિધૌ મિત્રં યદિ પ્રાણિનઃ ॥ ૮॥

સત્ત્વા એવ ગજાદિભાવગતયો દત્તા મયાઽનેકશઃ
સત્ત્વા એવ ચ પાત્રતામુપગતં દેયં મયા ગ્રાહિતાઃ ।
સત્ત્વૈરેવ વિચિત્રભાવગમનાદસ્મત્કૃપા વર્ધિતા
સત્ત્વાનેવ ન પાલયામિ યદિ ચેત્ કસ્યાર્થમર્થઃ કૃતઃ ॥ ૯॥

સંસારે વ્યસનાભિઘાતબહુલે ન સ્યુર્યદિ પ્રાણિનો
જન્માવર્તવિડમ્બનેન યમલોકં પ્રાપ્ય સાત્મીકૃતાઃ ।
સંસારાત્તરણં ચ સૌગતમિદં મહાત્મ્યમત્યદ્ભુતં
કસ્યાર્થેન સમીહિતં યદિ ન મે સત્ત્વા ભવેયુઃ પ્રિયાઃ ॥ ૧૦॥

યાવચ્ચેદં જ્વલતિ જગતઃ શાસનં શાસનં મે
તાવત્ સ્થેયં પરહિતપરૈરાત્મવદ્ભિર્ભવદ્ભિઃ ।
શ્રુત્વા શ્રુત્વા મમ વિરચિતં સત્ત્વહેતોરખિન્નૈઃ
ખેદઃ કાર્યો ન ચ તનુમિમં મુક્તસારં ભવદ્ભિઃ ॥ ૧૧॥

ઇતિ સમ્યક્સમ્બુદ્ધભાષિતા સત્ત્વારાધનગાથા સમાપ્તા ॥

*Sattvaradhanagatha*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*